Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

५११२२

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

શ્રીમદ્ બુદ્ધિકીર્તિસાગરસૂરી
જૈન જ્ઞાન મંદિર
ક્રમાંક
વિષયાંક ૯૨
વિષય

॥ श्रीजिनाय नमः ॥

(श्रीशुभशीलगणिविरचितं)

# ॥ श्रीअवंतीसुकुमालचरित्रम्

(द्वितीयावृत्तिः)

छपावी प्रसिद्ध करनार
पण्डित हीरालाल हंसराज (जामनगरवाळा)

किंमत. रु. ०-८-०    विक्रम संवत् १९८९

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥ श्रीजिनाय नमः ॥

॥ श्री चारित्रविजयगुरुभ्यो नमः ॥

# ॥ अथ श्रीअवंतीसुकुमालचरित्रं प्रारभ्यते ॥

( कर्त्ता—श्रीशुभशीलगणी )

छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज ( जामनगरवाळा )

श्वापदादिकृतान् योऽत्र । सहते चोपसर्गकान् ॥ प्राप्नोति चिंतितं स्थान—मवंतीसुकुमालवत्. अथ श्रीआर्यसुहस्तिनामानः सूरयो भूवलये विहरंतो भव्यजीवांश्च प्रतिबोधयंतोऽन्येद्युः श्रीदेवाधिदेवप्रतिमा-वंदनार्थमवंतिनगर्यां समाययुः. तत्र च ते श्रीसुहस्तिसूरयः साधुपरिवारयुता नगरनिकटे उद्याने स्थिताः. एवं तान् श्रुतपारगान् श्रीआर्यसुहस्तिसूरिवरानुद्याने स्थितान् विज्ञाय सहर्षा नगरलोकास्तेषां वंदनार्थं तत्र समाययुः. यतः—विना गुरुभ्यो गुणनीरधिभ्यो । जानाति धर्मं न विचक्षणोऽपि ॥ विना प्रदीपं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





शुभलोचनोऽपि । निरीक्षते कुत्र पदार्थसार्थं ॥ १ ॥ अवद्यमुक्ते पथि यः प्रवर्तते । प्रवर्तयत्यन्यजनं च निःस्पृहः ॥ स एव सेव्य स्वहितैषिणा गुरुः । स्वयं तरंस्तारयितुं क्षमः परं ॥ २ ॥ विदलयति कुबोधं बोधयत्यागमार्थं । सुगतिकुगतिमार्गौ पुण्यपापे व्यनक्ति ॥ अवगमयति कृत्याकृत्यभेदं गुरुर्यो । भवजलनिधिपोतस्तं विना नास्ति कश्चित् ॥ ३ ॥ ततः सर्वेषु लोकेषु यथास्थानं समुपविष्टेषु गुरुभिर्देशना प्रारब्धा, यथा —आर्यदेशकुलरूपबलायु—र्बुद्धिबंधुरमवाप्य नरत्वं ॥ धर्मकर्म न करोति जडो यः । पोतमुज्झति पयोधिगतः सः ॥ १ ॥ यः प्राप्य दुःप्राप्यमिदं नरत्वं । धर्मं न यत्नेन करोति मूढः ॥ क्लेशप्रबंधेन स लब्धमब्धौ । चिंतामणिं पातयति प्रमादात् ॥ २ ॥ आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं । व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते ॥ दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते । पीत्वा मोहमयीं प्रमादमदिरा मुन्मत्तभूतं जगत् ॥ ३ ॥ प्रमादः परमो द्वेषो । प्रमादः परमं विषं ॥ प्रमादो मुक्तिपूर्दस्युः । प्रमादो नरकालयः ॥ ४ ॥ अतो भो भव्याः ! प्रमादं परिहृत्य मोक्षसुखदायके धर्मे आदरो विधेयः. एवं सूरिवराणां धर्मोपदेशं श्रुत्वा बहवो धर्मार्थिनो भव्यमनुष्या सम्यक्त्वमूलानि

For Private and Personal Use Only

द्वादशश्राद्धव्रतानि जग्रहुः. अथ तत्रैवावंत्यां नगर्यां भद्राभिधः श्रेष्ठिवर्यो वसतिस्म, तस्य भद्रानाम्नी शीलादिभूरिगुणगणालंकृता भार्याबभूव. तौ दंपती जैनधर्मरतौ सर्वदा शुभभावेन देवगुरुभक्तिं कुर्वातेस्म. एवं धर्मकार्यपरयोस्तयोरन्येद्युः शुभस्वप्नसूचितो नंदनोऽभूत् हृष्टाभ्यां मातापितृभ्यां तस्य जन्मोत्सवो विहितः. पुत्रमुखं च दृष्ट्वा तौ दम्पती परमानंदं प्रापतुः, यतः—उत्पतन्निपतन् रिंखन् । हसन् लालावलीर्वमन् ॥ कस्याश्चिदेव धन्यायाः । क्रोडमायाति नंदनः ॥ १ ॥ शर्वरीदीपकश्चंद्रः । प्रभाते रविदीपकः॥ त्रैलोक्यदीपको धर्मः । सुपुत्रः कुलदीपकः ॥ २ ॥ एवं हृष्टाभ्यां मातापितृभ्यां तस्य बालस्यावंतीसुकुमाल इति नाम महोत्सवपूर्वकं विहितं. अथ स भद्राभिधः श्रेष्ठी तं बालं पाठशालायां कलाभ्यासार्थं कलाचार्यपार्श्वे प्रेषयामास. तत्र सोऽवंतीसुकुमालोऽपि सकलकलाभ्यासनिपुणो बभूव, ततः स भद्रश्रेष्ठ्यपि तं श्रीआर्यसुहस्तिनमाचार्यवरमुद्याने समेतं निशम्य तेषां वंदनार्थं परिवारयुतो ययौ. तत्र तेन सपरिवारेण विधिपूर्वकं ते सूरिवरा वंदिताः, सूरिभिरपि तेभ्यो धर्मपदेशो दत्तः, यथा—विलंबो नैव कर्तव्य । आयुर्याति दिने दिने ॥ न करोति यमः क्षांतिं । धर्मस्य त्वरिता गतिः ॥ १ ॥ रम्येषु वस्तुषु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनोहरतां गतेषु । रे चित्त केदमुपयासि किमत्र चित्रं ॥ पुण्यं कुरुष्व यदि तेषु तवास्ति वांछा । पुण्यं विना न हि भवंति समीहितार्थाः ॥ २ ॥ पुनः प्रभातं पुनरेव शर्वरी । पुनः शशांकः पुनरुत्थितो रविः॥ कालस्य किं गच्छति याति जीवितं । तथापि मूढः स्वहितं न बुध्यते ॥ ३ ॥ ग्रामांतरे विहितशंबलकः प्रयाति । सर्वोऽपि लोक इह रूढिरिति प्रसिद्धा ॥ मूढस्तु दीर्घपरलोकपथप्रयाणे । पाथेयमात्रमपि नो विदधात्यधन्यः ॥ ४ ॥ इत्यादिधर्मोपदेशं गुरुमुखान्निशम्य ताभ्यां दंपतीभ्यां सम्यक्त्वमूलानि द्वादश-श्राद्धव्रतानि स्वीकृतानि. ततस्तया भद्रया श्रेष्ठिन्या गुरुभ्यो विज्ञप्तिः कृता, हे भगवन् ! यूयमस्माकमुपरि कृपां विधाय नगरमध्ये समेत्य मदीयोपाश्रये चतुर्मासीं कुरुध्वं ? गुरुभिरुक्तं भो श्राविकोत्तमे ! यथावसरं विलोकयिष्यामः. ततः स भद्रः श्रेष्ठी स्वपरिवारयुतो गुरुभ्यो वंदनं विधाय नगरमध्ये निजगृहे समाययौ. अथ कियद्दिनानंतरं ते श्रीआर्यसुहस्तिसूरयोऽपि तस्या भद्राश्रेष्ठिन्या विज्ञप्त्या पुरीमध्ये समेत्य परिवारयुतास्तस्या एव गृहनिकटे उपाश्रयमध्ये चतुर्मासीं स्थिताः. अथान्येद्युः प्रदोषसमये प्रतिक्रमणक्रियानंतरं ते श्रीसूरिवरा मधुरया गिराऽदरपूर्वकं श्रीनलिनीगुल्माध्ययनपाठं गुणयंतिस्म, तदा

For Private and Personal Use Only

भद्रात्मजः सोऽवंतीसुकुमालो निजालये द्वात्रिंशल्ललनाभिः समं विविधप्रकारान् विलासभोगान् भुंजान उन्निद्रो गुरुवरैर्गुण्यमानं तन्नलिनीगुल्माध्ययनपाठमशृणोत्. तत् श्रुत्वा स लघुकर्मा निजचेतसीति दध्यौ, किमिदं गुरुभिः पठ्यमानवर्णनं नलिनीगुल्मविमानं मया क्वापि विलोकितमस्ति ? एवं पुनः पुनरुहापोहपरः सोऽवंतीसुकुमालो जातिस्मरणज्ञानमवाप्तवान्. तेन ज्ञानेन च तेनेति ज्ञातं, यत्पूर्वस्मिन् भवेऽहं नलिनीगुल्मविमाने देवोऽभवं, तत्र विमाने च मया यानि सुखानि विलसितानि, तेषां सुखानामग्रे मयेह भुज्यमानमिदं सुखं न किंचिदपि. तत्सुखेतरसुखयोर्मेरुसर्षपयोरिवांतरं विद्यते. यतः—देवस्स देवलोए । जं सुहं तं नरो सुभणिओवि ॥ न भणइ वाससएणवि । जस्सवि जीहासयं हुज्जं ॥ १ ॥ इति विमृश्य सोऽवंतीसुकुमालो नलिनीगुल्मविमानसुखलाभोत्सुकस्तासां विलासवतीनामपि निजस्त्रीणां भोगविलासांस्तृणवत्त्यक्त्वा विरक्तीभूय गुरुपार्श्वे गमनोत्सुको जातः, निजमनसि च स एवं मन्यतेस्म, यथा—दाराः परभवकारा । बंधुजनो बंधनं विषं विषयाः ॥ कोऽयं जनस्य मोहो । ये रिपवस्तेषु सुहृदाशाः ॥ १ ॥ त्यक्तेऽपि वित्ते दमितेऽपि चित्ते । ज्ञातेऽपि तत्वे गलिते ममत्वे ॥ दुःखैकगेहे विदिते च देहे । तथापि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मोहस्तरुणप्रगेहः ॥ २ ॥ जानामि क्षणभंगुरं जगदिदं जानामि तुच्छं सुखं । जानामींद्रियवर्गमेतमखिलं स्वार्थैकनिष्टं सदा । जानामि स्फुरिताचिरद्युतिचलं विस्फुर्जितं संपदां । नो जानामि तथापि कःपुनरसौ मोहस्य हेतुर्मम ॥ ३ ॥ एवमिहभवाद् वैराग्यपरोऽपि नलिनीगुल्मविमानसुखाधिगमेच्छया सऽवंतीसुकुमालो निजप्रासादात्तत्कालमुत्तीर्य श्रीआर्यसुहस्तिगुरोः पार्श्वे समाययौ. तत्र भक्तिपूर्वकं गुरुन्नमस्कृत्य स पप्रच्छ, हे भगवन् ! यूयं किमधुनैव नलिनीगुलमविमानादत्र समायाताः ? येन श्रीपूज्यैस्तत्रत्यं सकलं स्वरूपं कथ्यमानमस्ति. तत् श्रुत्वा गुरुभिः प्रोक्तं, भो महाभाग ! वयमधुना तत्र विमाने न गताः स्मः, इदानीमस्माभिस्तद्विमानं लोचनाभ्यामपि दृष्टं नस्ति. किंतु श्रीभगवता सिद्धांतोक्तं श्रीनलिनीगुल्मविमानस्वरूपपाठं वयमधुना गुणयामः. किंच तस्मिन् विमाने ये देवाः समुत्पद्यते, तेऽतीवसुखानि विलसंति. तत् श्रुत्वा सोऽवंतीसुकुमालो गुरुन् प्रति जगौ, हे भगवन् ! जातिस्मरणज्ञानतोऽहंजानामि यत् पूर्वभवेऽहं तत्रैव विमाने सुरतया समुत्पन्नोऽभवं. आयुःक्षये च ततश्च्युत्वाहमत्र मनुष्यलोके समुत्पन्नोऽस्मि. अथ तद्विमानसुखस्मरणादहमत्र मनुष्यलोके स्थातुं नेच्छामि, अथैतां मदीयललनाश्रे-

णिमहं राक्षसीतुल्या मन्ये, अतस्ताभ्योऽहं विरक्तो जातोऽस्मि, यतः—दुरितवनघनाली शोककासारपाली। भवकमलमराली पापतोयप्रणाली ॥ विकटकपटपेटी मोहभूपालचेटी। विषयविषभुजंगो दुःखसारा कृशांगी ॥ १ ॥ स्मितेन भावेन मदेन लज्जया। पराङ्मुखैरर्धकटाक्षवीक्षितैः ॥ वचोभिरीर्ष्याकलहेन लीलया। समंतपाशं खलु बंधनं स्त्रियः ॥ २ ॥ संमोहयंति मदयंति विडंबयंति। निर्भर्त्सयंति रमयंति विषादयंति ॥ एताः प्रविश्य सदयं हृदयं नराणां। किं नाम वामनयना न समाचरंति ॥ ३ ॥ पापागारमिदं वपुर्मलभृतं दृष्टिः सदोषाकुला। वक्त्रं चर्ममयं विगंधि कलुषं मांसोत्कराभौ स्तनौ ॥ जंघाद्यस्थिविभूषितं च सकलं यस्या विरूपं सदा। पश्यन्नप्ययमातनोति हृदये रागी कथं संमदं ॥ ४ ॥ ततो हे भगवन्! मह्यं कृपां विधाय दीक्षां यच्छत, येन मदीयं जन्म कृतार्थं करोमि. तत् श्रुत्वा गुरुभिरुक्तं, भो महाभाग! तव मातृपितृबंधुप्रभृतीनां मनुज्ञांविनास्माभिस्ते दीक्षा दातुं न शक्यते. तत् श्रुत्वा तद्विमानगमनोत्सुकीभूतेन तेनावंतीसुकुमालेन स्वयमेव तत्कालं दीक्षा गृहीता. ततः सोऽवंतीसुकुमालो वनमध्ये श्मशाने गत्वा कायोत्सर्गध्यानस्थस्तस्थौ, निजहृदये मनुष्यशरीरासारतां च चिंतयामास, यथा—

अमेध्यपूर्णे कृमिजालसंकुले । स्वभावदुर्गंध अशौच अध्रुवे ॥ कलेवरे मूत्रपुरीषभाजने । रमंति मूढा विरमंति पंडिताः ॥ १ ॥ इदं शरी परिणामदुर्बलं । पतत्यवश्यं श्लथसंधिजर्जरं ॥ किमौषधैः क्लिश्यति मूढ दुर्मते । निगमयं धर्मरसायनं पिब ॥ २ ॥ कस्तूरी पृषतां रदाः करटिनां कृत्तिः पशूनां पयो । धेनूनां छदमंडलानि शिखिनां रोमाण्यवीनामपि ॥ पुच्छस्नायुवसाविषाणनखरस्वेदादिकं किंचन । स्यात्कस्याप्युपकारि मर्त्यवपुषो नामुष्य किंचित्पुनः ॥ ३ ॥ जन्मेदं न चिराय भूरिभयदा लक्ष्म्योऽपिनैव स्थिराः । किंपाकांतफला नितांतकटवः कामाः क्षणध्वंसिनः ॥ आयुः शारदमेघचंचलतरं ज्ञात्वा तथा यौवनं । हे लोकाः कुरुतादरं प्रतिदिनं धर्मेऽधविध्वंसिनि ॥ ४ ॥ इत्यादिशरीरासारतां चिंतयन् स कायोत्सर्गेण स्थितः. इतस्तस्यावंतीसुकुमालस्य पूर्वभवसंबंधिनी प्रिया पूर्वमपमानीता मृत्वा शृगाली जाताभूत्. सा क्षुधातुरा शृगाली निजापत्यगणयुता दैवयोगेन रात्रौ तत्र श्मशाने समागता. तत्र निजपूर्वभवस्वामिनं स्वीयापमानकारकं तमवंतीसुकुमालं कायोत्सर्गस्थितं दृष्ट्वा समुल्लसितस्वाभाविकवैरानुभावा सा शृगाली क्रोधातुरा निजापत्यैः सह तदीयशरीरं खंडखंडं त्रोटयामास. अवश्यं भाविनो भावान्निवारयितुं

न कोऽपि समर्थः, यतः—पातालमाविशतु यातु सुरेंद्रलोक-मारोहतु क्षितिधराधिपतिं सुमेरुं ॥ मंत्रौ-षधैः प्रहरणैश्च करोतु रक्षां । यद्भावि तद्भवति नात्र विचारहेतुः ॥ १ ॥ अथैवं शृगाल्या विदार्यमाणश-रीरोऽवंतीसुकुमालस्तस्यै मनागपि निजमनसा क्रोधं न चकार. प्रत्युत निजहृदये इति विचारयामास— नो विद्या न च भेषजं न च पिता नो बांधवा नो सुता । नाभीष्टा कुलदेवता न जननी स्नेहानुबंधा-न्विता ॥ नार्थो न स्वजनो न वा परिजनः शारीरिकं नो बलं । नो शक्ताः सततं सुरासुरवराः संधातु-मायुः क्षमाः ॥ १ ॥ सदा सदाचारपरायणात्मनां । विवेकधाराशतधौतचेतसां ॥ जिनोदितं पंडितमृत्यु-मीयुषां । न जातु शोच्यं महतां महीतले ॥ २ ॥ त्यक्त्वा पुत्रधनादिमोहममतां कृत्वांतिमालोचना-मुच्चार्य व्रतमालिकामनशनं चादाय वीतस्पृहः ॥ सर्वप्राणिषु निष्कषायहृदयः कृत्वा त्रिधा क्षामणां । ध-न्यः पंचनमस्कृतिस्मृतिपरः कोऽपि त्यजेत् स्वं वपुः ॥ ३ ॥ जातस्य हि ध्रुवं मृत्यु-र्ध्रुवं जन्म मृतस्य च॥ तस्मादपरिहार्येऽर्थे । का तत्र परिदेवना ॥ ४ ॥ एवं निजहृदि विचारयन् सोऽवंतीसुकुमालो मुनिः शु-भध्यानात्तं मनुष्यदेहं त्यक्त्वा तदानीमेव पुनर्देवलोके नलिनीगुल्मविमाने समुत्पन्नः. अथ प्रातस्तस्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मातापितरौ प्रियाश्च तमवंतीसुकुमालमदृष्ट्वा भृशं शोकातुरा बभूवुः, नानाविधविलापांश्च चक्रुः. तदा श्रीआर्यसुहस्ति गुरवस्तान् सर्वानप्याश्वास्य तस्यावंतीसुकुमालस्य सर्वमपि निशावृत्तांतं जगुः, तदनंतरं च तेभ्यः प्रोक्तं अथ यूयं शोकं मा कुरुत ? स महापुण्यशाली अवंतीसुकुमालो निजदेहं परित्यज्य नलिनीगुल्मविमाने समुत्पन्नोऽस्ति, तत्र च देवांगनाभिः सह नानाविधविषयसुखानि भुंजानोऽस्ति. तद्वृत्तांतं श्रुत्वा तस्य मातापितरौ स्त्रियश्चातीवखेदं प्राप्ता मोहेन भृशं विलापान् कुर्वंतिस्म, यतो जगति मोहत्यागकरणं दुर्लभं. यदुक्तं—त्यक्तेऽपि वित्ते दमितेऽपि चित्ते । ज्ञातेऽपि तत्त्वे गलिते ममत्वे ॥ दुःखैकगेहे विदिते च देहे । तथापि मोहस्तरुणप्ररोहः ॥ १ ॥ जानामि क्षणभंगुरं जगदिदं जानामि तुच्छं सुखं । जानामींद्रियवर्गमेनमखिलं स्वार्थैकनिष्ठं सदा ॥ जानामि स्फुरिताचिरद्युतिचलं विस्फुर्जितं संपदां । नो जानामि तथापि कः पुनरसौ मोहस्य हेतुर्मम ॥ २ ॥ एवं तान् सर्वान् विलापान् कुर्वतो दृष्ट्वा तच्छोकव्यपोहार्थं गुरुभिस्तेभ्य उपदेशो दत्तः, यथा—जातस्य हि ध्रुवं मृत्यु—र्ध्रुवं जन्म मृतस्य च ॥ तस्मादपरिहार्येऽर्थे । का तत्र परिदेवना ॥ १ ॥ संयोगाः स्युर्वियोगांता । विपत्सीमाश्च संपदः ॥ स्यादा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नंदा विषादांतो । मरणांता जनिर्ध्रुवं ॥ २ ॥ वज्रकायशरीराणा-मर्हतां यद्यनित्यता ॥ कदलीसारतुल्येषु । का कथा शेषजंतुषु ॥ ३ ॥ उत्पत्तिरत्रास्ति विपत्तिसंयुता । न कोऽप्युपायोऽस्त्यमृतौ शरीरिणां सर्वेक्षिते चाध्वनि सर्वदावहे । ध्रुवे शुचा किं सुकृतं विधीयते ॥ ४ ॥ रुदता कुत एव सा पुन-र्न शुचा नानुमृतापि लभ्यते ॥ परलोकजुषां स्वकर्मभि—र्गतयो भिन्नपथा हि देहीनां ॥ ५ ॥ सदा सदाचारपरायणात्मनां । विवेकधाराशनधौतचेतसां ॥ जिनोदितं पंडितमृत्युमीयुषां । न जातु शोच्यं महतां महीतले ॥ ६ ॥ अर्हद्भक्तिमतां गुरुस्मृतिजुषां क्रोधादिशत्रुद्विषां । शक्त्या पंचनमस्कृतिं च जपतामाज्ञाविधिं तन्वतां ॥ इत्थं सिद्धिनिबंधनोद्यतधियां पुंसां यशःशालिनां । श्लाघ्यो मृत्युरपि प्रणष्टरजसां पर्यंतकालागतः ॥ ७ ॥ गुरुमुखादित्याद्युपदेशं श्रुत्वा शोकं परिहृत्य ते सर्वेऽपि गृहमध्ये प्राप्ताः. अथ यत्र स्थाने सोऽवंतीसुकुमालो देहं त्यक्त्वा स्वर्गे गतस्तत्र स्थाने तस्य मातापितृभ्यां महाकालाभिधो जिनप्रासादः कारितः, तत्र श्रीपार्श्वनाथप्रतिमा ताभ्यां स्थापिता. ततस्तस्य ताः सर्वा अपि प्रिया गुरोः पार्श्वे दीक्षां जगृहुः. ॥ इति श्रीअवंतीसुकुमालचरित्रं समाप्तं ॥ श्रीरस्तु ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आ चरित्र श्रीशुभशीलगणीजीए रचेला कथाकोष नामना ग्रंथमांथी उद्धरीने तेनी मूलभाषामां बनता प्रयासे सुधारो वधारो करी जामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयने माटे पोताना श्रीजैनभास्करोदय प्रेसमां छापीने प्रसिद्ध कर्युं.

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्री अवंतीसुकुमालचरित्रं समाप्तम् ॥

श्री जैनभास्करोदय प्रिन्टिंग प्रेसमां छाप्युं—जामनगर.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only